दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् माघशुक्लचतुर्थी
माघ 09 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-7 ■ वर्ष-5 ■ अङ्क-91 | 1 | जनवरी 22, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**2** केन्द्रेसर्वकारेण त्रिंशदेकत्रिंशदुत्तरद्विसहस्रतम वर्षपर्यन्तं अटल-पेन्शन-योजनायाः अनुवर्तनं स्वीकृतम्;

**4** सञ्जौली-हेलीपोर्टतः हेली-टैक्सी सेवाः आरब्धाः, मुख्यमन्त्रिणा कृतं शुभारम्भम्

**6** कुमारभास्करवर्मसंस्कृतपुरातनाध्यय नविश्वविद्यालये राज्यस्तरीया अखिलभारतीयशास्त्रीयस्फूर्तिस्पर्धा सम्पन्ना

## गणतन्त्रदिवसस्य सन्नद्धता

सप्तसप्ततितमः गणतन्त्रदिवसः आसन्नः अस्ति। नवदेहली-नगरस्य कर्तव्यपथे गणतन्त्रदिवसोत्सवस्य सज्जताः पूर्णतया प्रचलन्ति। विभिन्नक्षेत्राणां प्रायः दश सहस्रजनाः विशेष-अतिथि-रूपेण परेड्-इत्यस्य साक्षिणः भविष्यन्ति। पथसञ्चलेऽस्मिन् देशस्य संस्कृतिः, तस्य सैन्यशक्तिः, तस्य प्रसिद्धपरम्परायाः च अद्वितीयं मिश्रणं प्रदर्शयिष्यते।

## ग्रीनलैण्डदेशः डेनमार्क-देशस्य स्वाभाविकः भागः नास्ति- रशियादेशस्य विदेशमन्त्री सर्गी लैवरोवः

**हिमसंस्कृतवार्ताः** - रशियादेशस्य विदेशमन्त्री सर्गी लैवरोवः उक्तवान् यत् ग्रीनलैण्डदेशः डेनमार्क-देशस्य स्वाभाविकः भागः नास्ति, एतत् संयुक्तराष्ट्रसङ्घस्य शासनपत्रस्य भावस्य उल्लङ्घनं कुर्वन् उपनिवेशवादस्य परम्परा अस्तीति च। वार्तालापसम्मेलने भाषमाणः लैवरोवः अवदत् यत्, ग्रीन्-लेण्ड् इतीदं ऐतिहासिकरूपेण नार्वे-डेन्मार्क-देशयोः उपनिवेशः आसीत्, विंशति शताब्द्याः मध्यभागे एव डेन्मार्क-देशस्य सम्बद्ध-प्रदेशः अभवत्। श्रीलैवरोवः ट्रम्पस्य विचारं दृढतया निराकृतवान् यत् । सः अवदत् यत्, अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन ग्रीन्-लैण्ड-देशस्य अधिकारग्रहणस्य प्रयासः उत्तर-अलाण्टिक्-सन्धि-सङ्गटनस्य कृते गभीरसङ्कटञ्च सूचयति ।

## मतदानकेन्द्र-स्तरीयाः अधिकारिणः देशस्य निर्वाचन-लोकतन्त्रस्य आधारस्तम्भाः सन्ति - मुख्य-निर्वाचनायुक्तः

**हिमसंस्कृतवार्ताः** - मुख्य-निर्वाचनायुक्तः ज्ञानेश-कुमारः अवदत् यत् मतदानकेन्द्र-स्तरीयाः अधिकारिणः देशस्य निर्वाचन-लोकतन्त्रस्य आधारस्तम्भाः सन्ति । कुमारः नवदेहली-नगरे लोकतन्त्रं तथा निर्वाचनप्रबन्धनं 2026 इति विषये भारत-अन्ताराष्ट्रियसम्मेलनं सम्बोधयन् आसीत्। सः अवदत् यत्, भारतं लोकतन्त्रस्य जननी अस्ति तथा च प्रत्येकस्य योग्य निर्वाचकस्य समावेशेन सह शुद्ध-निर्वाचक-सूचीं निर्वोढुं लोकतन्त्रस्य सुदृढीकरणाय आवश्यकम् अस्ति।

# विदेशमन्त्री डा. एस्. जयशङ्करः नवदेहली-नगरे स्पेन्-देशस्य समकक्षीयेण जोस मेनुयल अल्बरेस ब्युनो इत्यनेन सह आतङ्कवादेति विषये वैश्विक-शून्य-सहिष्णुतायाः आवाहनञ्च अकरोत्



**हिमसंस्कृतवार्ताः** - विदेशमन्त्री डा. एस. जयशङ्करः अवदत् यत्, राष्ट्रैः सह बद्धप्रतिसन्धिः विशेषतः आतङ्कवादस्य निवारणे सहयोगः पूर्वकालात् अधिकः आवश्यकः अस्ति । डा. जयशङ्करः नवदेहल्यां स्पेन-देशस्य समकक्षीयेण जोस मेनुयल् अल्बरेस् ब्युनो इत्यनेन सह वार्तालापस्य आरम्भे उक्तवान् यत् भारत-स्पेन्-देशौ आतङ्कवाद-पीडितौ स्तः। सः अधोरेखितवान् यत् वैश्विकव्यवस्थायां गहनपरिवर्तनं प्रचलति, विश्वञ्च भयोत्पादकेति विषये शून्यं सहिष्णुतां स्वीकर्तुम् अर्हति। डॉ. जयशङ्करः अवदत् यत् अग्रिमे मासे नवदेहल्यां आर्टिफिसियल् इन्टेलिजेन्स् (ए. आई.) इम्पैक्ट समिट् 2026 इत्यस्य आतिथ्यं भारतं करिष्यति। सः उक्तवान् यत् ए.आई. इति विषये भारतस्य दृष्टिकोणः मानवकेन्द्रितः, सर्वसमावेशकः, उत्तरदायी-नैतिकमूल्येषु केन्द्रितश्च अस्ति, सहैव हि निकटतया यूरोप-देशस्य दृष्टिकोणानुरूपमपि अस्ति। मन्त्री अवदत् यत् अस्मिन् वर्षे भारत-स्पेन-देशयोः राजनैतिक सम्बन्धस्य सप्ततिः वर्षाणि पूर्णानि सन्ति, स्पेन-देशश्च यूरोपीय-सङ्घ भारतस्य महत्त्वपूर्णेषु व्यापारसहभागिषु अन्यतमः अस्ति ।

# ए.आई. इत्यस्य विनियमने न केवलं स्वतन्त्रनियमानामनुपालनं स्यात् अपितु टेक्नो-लीगल इति पद्धत्याः अनुसरणमपि कर्तव्यम्- अश्विनी वैष्णवः



**हिमसंस्कृतवार्ताः** - केन्द्रीय-इलेक्ट्रानिक्स् अथ सूचना-तन्त्रज्ञान-मन्त्री अश्विनी वैष्णवः अवदत् यत् ए.आई. इत्यस्य विनियमने न केवलं स्वतन्त्रनियमानामनुपालनं स्यात् अपितु टेक्नो-लीगल इति पद्धत्याः अनुसरणमपि कर्तव्यम्। सः दावोस नगरे विश्व-आर्थिक-मञ्चे भाषणं कुर्वन् एतदुक्तवान् यत् पक्षपातः, गहन-मिथ्याचारेत्यादीनां सङ्कटानां निवारणार्थं दृढ-तान्त्रिक-साधनानां आवश्यकतायाः विषये अवधानं दातव्यम्। सः इत्यपि अवदत् यत्, भारतं पक्षपातं न्यूनीकर्तुं, विश्वसनीयं गहनं मिथ्या-अभिज्ञानम् समर्थयितुं, तथा च ए. आई. माडेल्स् इत्यस्य प्रयोगात् पूर्वं समुचितं अज्ञानं सुनिश्चितं कर्तुं प्रौद्योगिकीः विकासयतीति। अत्रान्तरे, श्री वैष्णवः दावोस-नगरे विश्व-आर्थिक-मञ्चस्य पार्श्वे आई. बी. एम्. संस्थायाः सी. ई. ओ. अरविन्द कृष्णं अथ च मेटा-संस्थायाः मुख्य-वैश्विक कार्य-अधिकारी जोयल् कप्लान् इत्येतमपि मिलितवान्। सामाजिक-प्रसार माध्यमे मन्त्री अवदत् यत् विश्वदृष्ट्या भारतं वैश्विक-नवान्वेषणस्य प्रमुख-चालक-रूपेण अस्ति

## सुभाषितम्

**द्वावेव न विराजेते, विपरीतेन कर्मणा।**
**गृहस्थश्च निरारम्भः, कार्यवांश्चैव भिक्षुकः।।**
**(महाभारत, उद्योगपर्व- ३३/५७)**

भावार्थः- अकर्मण्य गृहस्थ और प्रपंची सन्यासी ये दोनों अपने विपरीत कर्म के कारण शोभा नहीं पाते। अतः गृहस्थ को अकर्मण्य और सन्यासी को प्रपंची कदापि नहीं होना चाहिए।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## सुनीता विलियम्स इत्येषा सप्तविंशति-वर्षाणां उल्लेखनीयसेवायाः अनन्तरं नासा-संस्थायाः सेवानिवृत्तिं प्राप्नोत्



**हिमसंस्कृतवार्ताः** - मानव-अन्तरिक्षयानस्य इतिहासे अत्यन्तनिपुणतमेषु अन्तरिक्षयात्रिकेषु अन्यतमा सुनीता विलियम्स इत्येषा सप्तविंशतिवर्षेभ्योऽपि अधिककालस्य उत्कृष्ट-जीवनवृत्तेः अनन्तरम् नासा इत्याख्यया अमेरिकीय-अन्तरिक्ष-संस्थायाः सेवानिवृत्तिं प्राप्नोत् ।

# राज्ये प्रथमवारं निर्मिता भविष्यति 'पोषणनीतिः', कण्डाघाट-प्रयोगशाला सुदृढा भविष्यति- मुख्यमंत्री



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविंद्रसिंहसुक्खुमहोदयः बुधवासरे स्वास्थ्यविभागस्य उपवेशनस्य अध्यक्षतां कुर्वन् अवदत् यत् राज्यसर्वकारः प्रदेशस्य प्रथमां पोषणनीतिं (Nutrition Policy) निर्मास्यति, येन जनाः समग्रेण रूपेण लाभान्विताः भवेयुः। सः उक्तवान् यत् राज्यसर्वकारः अनेकाः पोषण- खाद्यसुरक्षा- योजनाः सञ्चालयति, यथा- एकीकृत- बालविकाससेवा (ICDS), मध्याह्न- भोजन- योजना, (मिड डे मील) सार्वजनिक- वितरणप्रणाली (PDS) चेति।

सुक्खु महोदयः अवदत् यत् एतासां योजनानां दृष्ट्या 'न्यूट्रिशनल प्रोफाइलिंग' (Nutritional Profiling) अतीव आवश्यकी वर्तते। अनेन जनेभ्यः भोजने विद्यमानानां पोषकतत्त्वानां, 'कैलोरी' (Calorie) मात्रायाः, 'फूड फोर्टिफिकेशन' (Food Fortification) विषये जागरुकता भविष्यति। सः अज्ञापयत् यत् नीतिम् अन्तिमरूपं दातुं पूर्वं राज्ये पोषण-खाद्यपरीक्षणेन सम्बद्धाः आधारभूतसुविधाः सुदृढाः क्रियन्ते। अस्य अन्तर्गतं कण्डाघाट-स्थिता संयुक्त- परीक्षण- प्रयोगशाला' (Composite Testing Lab) परिष्कृता (Upgrade) भविष्यति तथा च नवीनाः प्रयोगशालाः स्थापयिष्यन्ते। प्रथमचरणे काङ्गडा- जनपदे नूतना प्रयोगशाला निर्मीयते। आगामिषु वर्षेषु राज्यस्य अन्येषु भागेषु अपि क्षेत्रीय- परीक्षण- प्रयोगशालाः स्थापयिष्यन्ते।

मुख्यमन्त्री अवदत् यत् राज्यमन्त्रिमण्डलेन सम्प्रति काङ्गडा-मण्डी-शिमला-बद्दी (सोलनम्) क्षेत्रेषु नूतनानां प्रयोगशालानां निर्माणप्रस्तावाय अनुमतिः दत्ता। कण्डाघाट-प्रयोगशालायाः सुदृढीकरणाय ८.५० कोटिरूप्यकाणि तथा च काङ्गडामध्ये खाद्यपरीक्षणप्रयोगशालायै २५ कोटिरूप्यकाणि प्रदास्यन्ते। मुख्यमन्त्री निर्देशं दत्तवान् यत् एतासां प्रयोगशालानां सुचारुसञ्चालनाय पर्याप्तस्य कर्मचारीवृन्दस्य (Staff) व्यवस्था क्रियते। अस्मिन् उपवेशने मुख्यमन्त्रिणः प्रधानपरामर्शदाता (मीडिया) नरेशचौहानः, मुख्यमन्त्रिणः सचिवः राकेश कंवरः, स्वास्थ्यविभागस्य विशेषसचिवः जितेन्द्र साञ्जटा च उपस्थिताः आसन्।

# हिमाचलप्रदेशे भवन-निर्माणाय २८ कोटि- रूप्यकैः क्रयीकृता खातगर्तयुक्ता भूमिः; विजिलेंस- अनुसन्धानम् आरब्धम्




**हिमसंस्कृतवार्ताः ऊना** ।हिमाचलप्रदेशस्य ऊना-मण्डले हरौली- विधानसभाक्षेत्रे भूमिक्रयनाम्ना महत् कपटाचारः प्रकाशं गतः। आरोपः अस्ति यत् हिमुडा संस्थया राजस्वविभागेन सह मिलित्वा खाई- खड्डु- नालायुक्ता प्रायः ६०० कनाल-परिमिता भूमिः २८ कोटिरूप्यकैः क्रयीकृता, येन भूमिस्वामिने अनुचितः लाभः प्रदत्तः। प्रारम्भिक- अनुसन्धानानन्तरं विजिलेंसविभागेन भूमिस्वामिनः विरुद्धं वञ्चन-जालिक-प्रकरणे अभियोगः (प्राथमिकी) पञ्जीकृतः। शासनात् अनुसन्धान- अनुमतिः लब्धा, अतः आगामि- दिवसेषु हिमुडा, राजस्व-विभागस्य च अधिकारिणः, कर्मचारिणः चापि अस्मिन् प्रकरणे उत्तरदायित्वे स्थापयिष्यन्ते।

## २०१३ तमे वर्षे हिमुडाद्वारा भूमिक्रयप्रक्रिया आरब्धा

विजिलेंस- ब्यूरो इत्यस्य कथनानुसारं २०१३ तमे वर्षे हिमुडया क्षेत्रे फ्लैट-निर्माणाय प्रायः ६०० कनालपरिमिता भूमेः क्रयप्रक्रिया आरब्धा। तत्काले कांग्रेस-शासनकाले आरब्धा एषा प्रक्रिया भाजपा-शासनकाले पूर्णतां गता। हिमुडया २८ कोटि-रूप्यकैः जरनैल-सिंहं तस्य परिवारस्य अन्यैः सहभागिभिः सह भूमिः क्रयीकृता। अनुसन्धानात् एतत् स्पष्टं जातं यत् क्रयीकृता भूमिः न समतला, न च फ्लैट-निर्माणाय उपयुक्ता। अद्यापि अस्याः भूमेः विषये किमपि विकासयोजना न निर्मिता। अपि च सर्किल-दर- आधारेण अधिकमूल्ये भूमिः क्रयीकृता, येन भूमिस्वामिने अनुचितः लाभः अभवत्, सरकारीराजस्वस्य च हानिः जाता।

## विजिलेंसस्य प्रारम्भिक-अनुसन्धाने आरोपाः सत्याः सिद्धाः

कश्चन व्यक्तिः भूमिक्रय-सम्बद्धस्य कपटाचारस्य विषये विजिलेंस-ब्यूरो प्रति अभियोजनं अकरोत्। तस्याः उपालम्भ-आधारेण कृतायां प्रारम्भिक- अनुसन्धाने आरोपाः सत्याः सिद्धाः। तदनुसारं विजिलेंसविभागेन भूमिस्वामिनः विरुद्धं प्राथमिकी पञ्जीकृता। अधुना प्रकरणे संलिप्तानां हिमुडासंस्थायाः राजस्व-विभागस्य च अधिकारिणां कर्मचारिणां च विरुद्धं कार्यवाहीसिद्धता क्रियते। सूत्रैः ज्ञायते यत् शासनात् अनुसन्धान-अनुमतिः प्रदत्ता। विजिलेंसविभागेन ऊनानगरात् शिमला- सचिवालय- पर्यन्तं हिमुडा-अधिकारिणां, राजनीतिज्ञानाम्, अन्येषां प्रभावशालिनां विरुद्धं अनुसन्धानम् आरब्धम्। प्रकरणसंबद्धाः सर्वे तथ्याः संगृहीताः सन्ति। आगामिदिवसेषु बन्धनं सम्भाव्यः।ऊनामण्डले फ्लैट- निर्माणाय भूमिक्रयप्रकरणे गम्भीराः अनियमितताः प्रकाशं गताः। भूमिः खाई- खड्डु- नालायुक्ता अभवत्, तथा तस्याः मूल्यं सर्किलदरात् अधिकं दर्शितम्। डी.एस.पी. फिरोज खानस्य नेतृत्वे दलं प्रकरणस्य सूक्ष्म-अनुसन्धानं कुर्वन् अस्ति, शीघ्रं च प्रतिवेदनं शासनाय समर्पयिष्यति।

**-अदिति सिंह, डी.एस.पी., विजिलेंस-ब्यूरो।**

# केन्द्रेसर्वकारेण त्रिंशदेकत्रिंशदुत्तरद्विसहस्रतम वर्षपर्यन्तं अटल-पेन्शन-योजनायाः अनुवर्तनं स्वीकृतम्; सहैव हि स्माल-इण्डस्ट्रीस- डेवेलपमेण्ट-बैंक-आफ-इण्डिया इत्यत्र पञ्च- सहस्रकोटिरूप्यकाणां निवेशस्य निर्णयः कृतः

Atal Pension Yojana

## अटल पेंशन योजना

**हिमसंस्कृतवार्ताः -** सर्वकारेण विंशति- त्रिंशत्-एकत्रिंशत् इति वर्षपर्यन्तं अटल पेन्शन योजनायाः अनुवर्तनं, प्रचार-विकास-कार्याणां कृते वित्तपोषणस्य विस्तारः च स्वीकृतः। असङ्गठितक्षेत्रस्य कर्मचारिभ्यः वृद्धावस्थायाम् आयस्य सुरक्षां प्रदातुं पञ्चदशोत्तरद्विसहस्र- तमवर्षस्य मई-मासे इयं योजना आरब्धा। नवदेहली-नगरे प्रधानमन्त्रिणः नरेन्द्रमोदीवर्यस्य आध्यक्ष्ये आयोजितायां वरिष्ठमन्त्रि-सभायाम् अयं निर्णयः कृतः। एषा योजना अभिदातॄणां योगदानाधारेण षष्ठि-वयसः अनन्तरं प्रतिमासं एकसहस्रतः पञ्चसहस्रपर्यन्तं निश्चितं न्यूनतमं निवृत्तिवेतनम् प्रदीयते। अद्यावधि अस्याः योजनायाः अन्तर्गतं सार्धाष्टकोटितोऽधिकाः अभिदातारः नामाङ्किताः सन्ति। योजनैषा देशस्य समावेशी-सामाजिक-सुरक्षा-संरचनायाः आधारशिला अस्तीति सिध्यते।

# केन्द्रीयमन्त्रिमण्डलेन भारतीय-लघु- उद्योग-विकास-वित्तकोषाय पञ्च- सहस्र-कोटिरूप्यकाणां इक्विट्याख्यं-समर्थनं स्वीकृतम्

सिडबी sidbi

**हिमसंस्कृतवार्ताः -** केन्द्रीयमन्त्रिमण्डलेन भारतीय-लघु-उद्योग-विकास-वित्तकोषाय पञ्च-सहस्र-कोटिरूप्यकाणां इक्विट्याख्यं- समर्थनं स्वीकृतम्। प्रधानमन्त्रिणः नरेन्द्रमोदिनः अध्यक्षतायां सभया अयं निर्णयः कृतः। अनेन कार्येण प्रायः पादोन षड्विंशति लक्षसंख्यकेभ्यः मध्यमलघूद्योगिभ्यः आर्थिकलाभाः प्रदास्यन्ते।

# हिमाचलप्रदेशे प्रायः १००० सर्वकारीय-भवनानि रिक्तानि, भाटकगृहेषु सञ्चालितानां कार्यालयानां स्थानान्तरणाय निर्देशाः प्रदत्ताः



हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेशे सर्वकारी- संसाधनानाम् उपयोगं प्रति पुनः गम्भीराः प्रश्नाः उद्भवन्ति। मङ्गलवारे राज्यसचिवालये आयोजितायां मन्त्रिमण्डलीय-उपसमितेः सभायां एतत् आश्चर्यजनकं तथ्यं प्रकाशं गतं यत् प्रदेशव्यापि प्रायः १००० सर्वकारीयभवनानि रिक्तानि स्थितानि सन्ति, किन्तु अनेके विभागाः अद्यापि सशुल्कगृहेषु स्वीयान् कार्यालयान् सञ्चालयन्ति। अनेन प्रतिवर्षं शासनस्य उपरि कोटिरूप्यकाणां अतिरिक्तः वित्तीयभारः भवति। सभायाः अध्यक्षतां वहन् राजस्वमन्त्री जगतसिंह नेगी एतस्मिन् विषये तीव्रं असन्तोषं प्रकटयन् अधिकृतान् स्पष्टनिर्देशान् दत्तवान् यत् यत्र-यत्र सर्वकारीय-भवनानि उपलब्धानि सन्ति, तत्र त्वरितप्रभावेन कार्यालयाः स्थानान्तरिताः क्रियन्ताम्। सः अवदत् यत् यदा शासनस्य स्वकीयानि भवनानि विद्यमानानि सन्ति, तदा भाटके कार्यालयसञ्चालनं न केवलं अव्यवहारिकम्, अपि तु राजकोषीय-अनुशासनस्य अपि विरुद्धम्। उपसमितेः समक्षं प्रस्तुतानां तथ्यानाम् अनुसारं बहुषु जिलेषु उपमण्डलेषु च विभागानां स्वकीयानि भवनानि सन्ति, किन्तु तानि वा अनुपयोगीनि स्थितानि सन्ति, अथवा अनुरक्षणाभावेन उपयोगाय न नीयन्ते। अपरतः ते एव विभागाः निजीभवनेषु अधिकं शुल्कं दत्त्वा कार्यं कुर्वन्ति। अनेन सर्वकारीधनस्य अपव्ययः भवति।

## रिक्तभवनानां विभागानुसारं सूची- सज्जीकर्तुम् आदेशः

मन्त्री जगतसिंह नेगी अधिकृतान् निर्देशितवान् यत् रिक्तानां सर्वकारी-भवनानां विभागानुसारं सूची निर्मीयतां सशुल्कगृहेषु च सञ्चालितानि कार्यालयानि क्रमशः एतेषु भवनेषु स्थानान्तरयितुं समयबद्धां कार्य-योजनाम् अपि निर्मीयताम्। यत्र भवनानां जीर्णोद्धारः अथवा मूलभूतसुविधानां आवश्यकता अस्ति, तत्र प्राधान्यक्रमेण बजट-व्यवस्था क्रियताम् इति अपि सः अवदत्।

## अनावश्यक- व्ययन्यूनतायै मन्त्रिणां बलप्रदानम्

अस्मिन् सम्मेलने मन्त्रिमण्डलीयमन्त्री राजेश धर्माणी, यादवेंद्र गोमा चापि उपस्थितौ आस्ताम्। सर्वैः मन्त्रिभिः एकस्वरेण सर्वकारी-सम्पत्तीनां समुचित- उपयोगः अनावश्यकव्ययानां न्यूनता च बलात् प्रतिपादिता। मन्त्रिणां मतं यत् एतेन उपायेन न केवलं सर्वकारी-कोषस्य भारः न्यूनो भविष्यति, अपि तु प्रशासनिक-कार्यप्रणाली अपि अधिकं सुव्यवस्थिता प्रभावी च भविष्यति। अपि च अवदत् यत् पञ्चायत-निर्वाचनानि समये एव सम्पन्नानि स्याताम्।

## आपदाभिः क्षतिग्रस्तानां २५० भवनानां चिह्नाङ्कनं, जीर्णोद्धारश्च

राज्ये आपदासमये निजीविमानचक्रिकाणां शुल्कग्रहणविषये अपि विचार-विमर्शः अभवत्। एषः विषयः मुख्यमन्त्रिणः, प्रदेशमन्त्रिमण्डलस्य समक्षं प्रस्तोतुं चर्चितः। एस.डी.आर.एफ. मध्ये रिक्तपदानि पुलिसबलात् पूरयितुं सहमति अपि जाता। प्रदेशे २५० भवनानि चिह्नितानि सन्ति, येषां रेट्रोफिटिङ इत्यस्य (दृढीकरणस्य) कार्यं क्रियते। नेगी अवदत् यत् प्रदेशस्य जीवनरेखा इति कथ्यमानाः प्रमुखाः संस्थाः- यथा आई.जी.एम.सी. शिमला, टांडा चिकित्सालय-महाविद्यालयः, दश क्षेत्रीय-चिकित्सालयाः, त्रयः जोनल- चिकित्सालयाः एतेषां मानचित्रणं कर्तव्यम्।मङ्गलवासरे राजस्वमन्त्री जगत्सिंह नेगी- अध्यक्षतायां मन्त्रिमण्डलीय-उपसमितेः बैठकः आयोजितः। अस्मिन् सम्मेलने तकनीकी-शिक्षा, नगरनियोजनमन्त्री च राजेश धर्माणी अपि उपस्थितः आसीत्। अत्र आपदा तथा पुनर्वाससम्बद्धेषु विविधेषु विषयेषु चर्चा कृता। अवगतं कृतं यत् पञ्चायतासु आपत्कालीन-प्रतिक्रिया-केन्द्राणि स्थाप्यन्ते। अपि च अवगतं यत् १८ दिसम्बर २०२५ दिने सचिवः पशुपालनं रितेशचौहानस्य अध्यक्षतायां राज्यस्तरीय-बीमासमितिः अधिसूचिता, या व्यक्तिगत-सार्वजनिक- सम्पत्तीनां कृते बीमाविकल्पानां अन्वेषणं करिष्यति।

# हिमाचलप्रदेशे अद्यावधि धरातले न अवतरिताः मन्त्रिमण्डल-सम्मेलनस्य गृहीता ४४ निर्णयाः



हिमसंस्कृतवार्ताः- शिमला ।हिमाचलप्रदेशस्य मन्त्रिमण्डल-सम्मेलने जनहिताय गृहीतानां बहूनां निर्णयानां धरातले कार्यान्वयनं अद्यापि न जातम्। अस्य विषये मन्त्रिमण्डलीय उपसमितौ मन्त्रिभिः कठोरता प्रदर्शिता। अधिकृतान् प्रति निर्देशाः दत्ताः यत् निर्णयाः गाम्भीर्येण स्वीक्रियन्ताम्। १३ जनवरी २०२३ तः ३० जून २०२५ पर्यन्तं मन्त्रिमण्डलसम्मेलनैः ११६० निर्णयाः गृहीताः, तेषु १११६ निर्णयाः कार्यान्विताः। अवशिष्टानां ४४ निर्णयानां विषये मन्त्रिमण्डलीय उपसमितेः सम्मेलने चर्चा अभवत्। एतेषु वित्तः, स्वास्थ्यः, उद्योगः, जलशक्तिः, बहुउद्देश्यीय- परियोजना- ऊर्जा, पर्यटनं, परिवहनविभागैः सम्बन्धिताः निर्णयाः सन्ति। मन्त्रिमण्डलीय उपसमितेः सम्मेलने एतद् उद्घाटितम्।अस्य सम्मेलने अध्यक्षतां राजस्व, बागवानी, जनजातीय- विकास- जन- शिकायत- निवारणमन्त्री जगत्सिंह नेगी अकुर्वन्। मन्त्रिमण्डलीय उपसमितेः सम्मेलने आवास, तकनीकीशिक्षा- व्यावसायिक- औद्योगिक- प्रशिक्षणं, नगर-नियोजनमन्त्री राजेश धर्माणी, आयुष, युवासेवाः, क्रीडा, विधिमन्त्री यादविन्द्र गोमा अपि उपस्थिताः आसन्। अस्मिन् अवसरे मन्त्रिमण्डलसम्मेलनेषु गृहीतानां निर्णयानां कार्यान्वयनस्य समीक्षा अपि कृता।जगत्सिंह नेगी महोदयेन अधिकृतान् प्रति निर्देशाः दत्ताः यत् एते निर्णयाः समयबद्धरीत्या कार्यान्विताः भवन्तु, येन सामान्यजनाः लाभं प्राप्नुयुः। नगरनियोजनमन्त्री राजेश धर्माणी अवदत्- "वयं प्रदेशस्य जनतां न विस्मर्तव्यम्। राज्य- सर्वकारस्य प्रत्येकः अधिकारिणः कर्मचारिणश्च जनानां प्रति उत्तरदायी अस्ति।"सम्मेलने अतिरिक्त-मुख्यसचिवः आर. डी. नजीम, अतिरिक्त-मुख्य-सचिवः श्यामभगतनेगी, प्रधानसचिवः देवेशकुमारः, सदस्यसचिवः हरबंस सिंहः ब्रसकोन, सचिव डिजिटल- टेक्नोलॉजी- एण्ड- गवर्नेंस आशीष सिंहमार, पर्यटनम् एवं नागरिक-उड्डयन-निदेशकः विवेक भाटिया अपि उपस्थिताः आसन्।

# लोकतन्त्रे शासने शक्तयः जनतातः एव निर्गच्छन्ति- विधानसभाध्यक्षः कुलदीप पठानिया

हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।हिमाचलप्रदेशस्य विधानसभाध्यक्षः कुलदीपसिंहपठानिया उक्तवान् यत् लोकतन्त्रे जनता एव सर्वोच्चा वर्तते, शासनस्य सर्वाः शक्तयः च जनतातः एव उत्पद्यन्ते। सः जनवरी मासस्य १९ दिनाङ्कतः २१ दिनाङ्कपर्यन्तं लखनऊनगरे आयोजितस्य ८६तम- अखिलभारतीय- पीठासीन- अधिकारीसम्मेलनस्य (All India Presiding Officers' Conference) अवसरे बुधवासरे **'जनतां प्रति विधायिकायाः उत्तरदायित्वम्'** इति विषये स्वविचारान् प्रकटीकृतवान्। पठानिया महोदयः अवदत् यत् लोकतान्त्रिकव्यवस्थायाः त्रयः स्तम्भाः- विधायिका, कार्यपालिका, न्यायपालिका च- जनतां प्रति उत्तरदायिनः भवन्ति। एतेषु विधायिकायाः स्थानं विशिष्टं अस्ति, यतः एषा संस्था जनतायाः प्रत्यक्षं प्रतिनिधित्वं करोति। एषा नियमनिर्माणं, नीतिनिर्धारणं, सर्वकारस्य उपरि नियन्त्रणं च सदृशानि महत्त्वपूर्णानि कार्याणि करोति। अतः जनतां प्रति विधायिकायाः उत्तरदायित्वं लोकतन्त्रस्य आत्मा इति मन्यते। सः अधिकं उक्तवान् यत् यदि विधायिका जनतायाः अपेक्षाणाम्, आवश्यकतानां, हितानां च प्रति उत्तरदायी न भवति, तर्हि लोकतन्त्रं केवलं नाममात्रम् अवशिष्यते। शेषं ४ पृष्ठे...

# सञ्जौली-हेलीपोर्टतः हेली-टैक्सी सेवाः आरब्धाः, मुख्यमन्त्रिणा कृतं शुभारम्भम्



हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशस्य राजधान्याः शिमलायाः सञ्जौली- हेलीपोर्ट इत्यस्मै केन्द्रात् आवश्यकी अनुमतिः प्राप्ता, अधुना एतत् आधिकारिकरूपेण विमानसेवाभ्यः उद्घाटितम्। अनेन सहैव द्वे कम्पनी (Companies) अत्र हेली-टैक्सी सेवाः आरब्धवत्यौ। बुधवासरे प्रातः मुख्यमन्त्री सुखविन्द्रसिंहसुक्खुः रिकाङ्गपियो तथा भुन्तरं प्रति उड्डयनस्य हरितसंकेतं (Green Flag) प्रदर्श्य प्रस्थानं कारितवान्। अस्मिन् अवसरे हेली-टैक्सी विमानाय जल-तोपिकाभिवादनम्' (Water Cannon Salute) अपि दत्तम्। राजस्वमन्त्री जगतसिंहनेगी अपि अनया सेवया किन्नौरं प्रति प्रस्थितवान्।

हेरिटेज एविएशन्, पवन हंस लिमिटेड इति द्वे कम्पन्यौ इमे सेवाः प्रयच्छतः। हेरिटेज एविएशन् शिमला-रिकाङ्गपिओ, कुल्लू मार्गयोः सेवां दास्यति, पवन हंस लिमिटेड च चण्डीगढ़-शिमला मार्गे सेवां दास्यति। एताः सेवाः 'उडान' (UDAN) योजनायाः अन्तर्गतम् आरब्धाः सन्ति। अस्य सञ्चालनव्ययस्य ८० प्रतिशतं केन्द्रसर्वकारः २० प्रतिशतं च राज्यसर्वकारः वहिष्यतः।

मुख्यमन्त्री अवदत् यत् अनया सेवया यात्रिणः शिमलातः चण्डीगढ़ं केवलं २० निमेषेषु प्राप्तुं शक्ष्यन्ति। सः अज्ञापयत् यत् सर्वकारः प्रत्येकं जनपदमुख्यालये प्रमुखपर्यटनस्थलेषु च हेलीपोर्ट निर्माति। हमीरपुरस्य जसकोट, काङ्गडायाः रक्कड़- पालमपुरं, चम्बा क्षेत्रेषु चतुर्णां हेलीपोर्ट-निर्माणकार्यं आगामी मार्च-अप्रैल मासपर्यन्तं पूर्णं भविष्यति। प्रत्येकं हेलीपोर्ट-निर्माणे प्रायः १५ कोटिरूप्यकाणि व्ययितानि भवन्ति। अनेन उच्चवर्गस्य पर्यटकाः हिमाचलम् आगमिष्यन्ति, स्थानीयजनानां आयः च वर्धिष्यते।

## पर्यटनार्थं भविष्यति अधिकं बजट-प्रावधानम्

पत्रकारैः सह वार्तालापकाले मुख्यमन्त्री अवदत् यत् काङ्गडा- अन्ताराष्ट्रिय- विमानपतनस्य (Airport) विस्तारीकरणं प्रति सर्वकारः अग्रे सरति। भूम्यधिग्रहणाय (Land Acquisition) सार्धत्रिसहस्रकोटिरूप्यकाणाम् आवश्यकता अस्ति, यस्य प्रावधानं क्रियते। सः उक्तवान् यत् सर्वकारः आर्थिकस्थितिं सुदृढां कर्तुम् आत्मनिर्भरतां प्राप्तुं च पदं स्थापितवान्। शीघ्रमेव पर्यटनक्षेत्राय अधिकस्य बजटस्य (Budget) प्रावधानं करिष्यते। अस्य लाभः आगामिसमये पर्यटन-उद्योगाय भविष्यति। अस्मिन् अवसरे पर्यटनविकासनिगमस्य उपाध्यक्षः आर. एस. बाली, विधायकः नीरज नैय्यरः, मुख्यमन्त्रिणः प्रधानपरामर्शदाता नरेशचौहानः, पर्यटननिदेशकः विवेक भाटिया, अन्ये वरिष्ठाधिकारिणश्च उपस्थिताः आसन्।

# काङ्गडा-जनपदे विपक्षस्य नेतुः जयरामठाकुरस्य गर्जना; सुक्खु-सर्वकारस्य 'मित्रमण्डल्याः' ऋणस्य च उपरि तीक्ष्णः प्रहारः



हिमसंस्कृतवार्ताः- धर्मशाला। विपक्षस्य नेताजयरामठाकुरः बुधवासरे स्वस्य पूर्वनिर्धारित- दिल्ली- भ्रमणात् साक्षात् काङ्गडाजनपदं प्राप्य न केवलं सङ्घटनात्मक- उपवेशनानां माध्यमेन आगामिनिर्वाचनस्य शङ्खनादं कृतवान्, अपितु मानवीयसंवेदनां प्रदर्शयन् सङ्कटे ग्रस्तस्य हिमाचली-युवकस्य परिवाराय सान्त्वनाम् अपि दत्तवान्। काङ्गडा-विमानपत्तनं प्राप्य तस्य भव्यस्वागतम् अभवत्, तदनन्तरं सः साक्षात् रक्षित चौहानस्य गृहं गतवान्। रक्षितः तस्य रूसी-पोतस्य 'बेला-१' (Bella-1) इत्यस्य चालकदलस्य सदस्यः (Crew Member) अस्ति, यं सम्प्रति अमेरिकादेशेन निरुद्धं (Seize) कृतम् अस्ति। अस्मिन् कठिने समये परिवारेण सह मिलित्वा जयरामठाकुरः आश्वस्तं कृतवान् यत् भारतसर्वकारः, स्वयं विदेशमन्त्री डॉ. एस. जयशङ्करः च अस्मिन् प्रकरणे कूटनीतिकदृष्ट्या तीक्ष्णदृष्टिं धारयतः, रक्षितस्य सुरक्षित- स्वदेश- प्रत्यागमनाय च सर्वविध-प्रयासाः प्रचलिताः सन्ति।

तदनन्तरं, नगरोटाबगवां, धर्मशाला क्षेत्रेषु विविधासु सङ्घटनात्मक-गोष्ठीषु भागं गृह्णन् जयराम ठाकुरः वर्तमान-सुक्खु-सर्वकारस्य उपरि तीव्रं प्रहारं कृतवान्। प्रदेशस्य विघटित-आर्थिकस्थितेः राजनैतिक-अस्थिरतायाः च उपरि कटाक्षं कुर्वन् सः अवदत् यत् "अयं सर्वकारः कस्यापि बाह्यप्रभावात् न, अपि तु स्वस्यैव कुप्रबन्धनस्य भारेण पतिष्यति।" जयराठाकुरमहोदयः अवदत् यत् हिमाचलस्य इतिहासे अयं प्रथमः तादृशः सर्वकारः अस्ति यः संस्थानानां उद्घाटनात् पूर्वं तानि पिधातुं (Close) कीर्तिमानं स्थापितवान्। सः मुख्यमन्त्रिणं लक्ष्यीकृत्य सः अवदत् यत् सुक्खुसर्वकारः केवलं 'फीता-कर्तनस्य' (Inauguration) संघर्षे अस्ति, भाजपा-कार्यकालखण्डे २०२२ तमे वर्षे एव लोकार्पितस्य सञ्जोली-हेलीपोर्ट सदृशानां कार्याणां पुनः उद्घाटनं कृत्वा जनतां भ्रामयितुं प्रयतते।

## आर्थिक-स्थितेः उपरि चिन्ता

विपक्षस्य नेता अङ्कैः सह सर्वकारं अतिक्रान्तवान्। सः उक्तवान् यत् यस्मिन् प्रदेशे विकासकार्याणि पूर्णतया स्थगितानि सन्ति, तत्र धनं कुत्र गच्छति? जयराम ठाकुरस्य अनुसारम्-

> भाजपा सर्वकारः ५ वर्षाणां कार्यकालखण्डे केवलं १९ सहस्रकोटि (19,000 Cr) रूप्यकाणां ऋणं स्वीकृतवान्।

- वर्तमान सर्वकारः केवलं ३ वर्षेषु प्रदेशस्य उपरि ४० सहस्रकोटि (40,000 Cr) रूप्यकाणां अतिरिक्तं ऋणभारं स्थापितवान्।

सः आरोपं कृतवान् यत् प्रदेशस्य विकासापेक्षया केवलं मुख्यमन्त्रिणः 'मित्रमण्डल्याः' गृहाणि पूर्यन्ते। काङ्ग्रेसदलस्य आन्तरिक-कलहस्य विषये सः अवदत् यत् यदा वरिष्ठनेतृणां अपमानं भविष्यति, मुख्यमन्त्री प्रतिशोधभावेन कार्यं करिष्यति, तदा धैर्यस्य विनाशः स्वाभाविकः अस्ति। सः विधायकस्य सुधीरशर्मा महोदयस्य उदाहरणं दत्तवान् यत् स्वाभिमानी नेतारः अद्य भाजपादलेन सह सन्ति।

अन्ते सः कार्यकर्तॄन् आहूतवान् यत् ते सङ्घटिताः भूत्वा सर्वकारस्य विफलताः जनं जनं प्रति नयन्तु, यतः जनता अधुना अस्याः 'मित्राणां सर्वकारतः' त्रस्ता अस्ति, परिवर्तनस्य च मनः कृतवती अस्ति। अस्मिन् अवसरे सुधीरशर्मा, पवन काजलः, अरुण कुमारः कुक्का, विशाल नैहरिया, सञ्जय शर्मा तथा च अन्ये भाजपा-नेतारः उपस्थिताः आसन्।

# विधानसभाध्यक्षः कुलदीप पठानिया

पठानिया महोदयः स्पष्टं कृतवान् यत् विधायिका सा संस्था अस्ति, या नियमानां निर्माणं, संशोधनं, निरसनं च करोति। भारते विधायिका 'संसद्' तथा 'राज्यविधानमण्डलम्' इति रूपेण दृश्यते। विधायिकायाः उत्तरदायित्वस्य अर्थः अस्ति यत् सा जनहितार्थं कार्यं कुर्यात्, लोकानां समस्याः अवगच्छेत्, तासां समाधानाय च नियमान् रचयेत्। यदि सा स्वकर्तव्ये विफला भवति, तर्हि जनता निर्वाचनमाध्यमेन तां परिवर्तयितुं शक्नोति। सः अस्याः संस्थायाः उच्चपरम्परायाः गरिमायाः च उल्लेखं कृतवान्। सः स्मृतवान् यत् देशस्य प्रथमः निर्वाचितः पीठासीन-अधिकारी विठ्ठलभाई पटेल महोदयः १९२५ तमे वर्षे अस्मिन्नेव भवने निर्वाचितः अभवत्। अस्मिन् अवसरे सः उत्तरप्रदेशस्य विधानसभाध्यक्षस्य, सर्वकारस्य, अधिकारिणां च आतिथ्यसत्कारार्थं हार्दिकं धन्यवादं दत्तवान्, ८६ तमस्य सम्मेलनस्य सफल-आयोजनस्य च वर्धापनानि प्रेषितवान्। अन्ते, पठानिया महोदयः लोकसभाध्यक्षस्य ओमबिरलामहोदयस्य पक्षतः आयोजितं रात्रिभोजं (Dinner) अपि प्राप्तवान्। सः सर्वैः पीठासीन- उपपीठासीन- अधिकारिभिः सह २२ जनवरी दिनाङ्के प्रातः ९:०० वादने अयोध्यां प्रति प्रस्थास्यति।

# “देहः नश्वरः, सेवा च अमृता” – स्वर्गीयस्य कुणालरावतस्य पदचिह्नानुसरणं महान् त्यागः मानवतायाः दीपं प्रज्वालयति






**हिमसंस्कृतवार्ताः कोटद्वारम्, कुलदीपमैन्दोला ।** रक्तदानात् जीवनरक्षणं, अङ्गदानात् अमरत्वप्राप्तिः — ‘संकल्पदिवसे’ प्रेरणादायकाः विचाराः प्रतिध्वनिताः। यदा कश्चन जनः स्वस्य अस्तित्वावशेषैः अन्येषां उज्ज्वलतां करोति, तदा स न म्रियते, अपि तु “अमरः” भवति। एतत् महान् सामाजिकं आदर्शं सजीवयन् स्वर्गीय-अङ्गदानी कुणालरावतस्य द्वितीय-पुण्यतिथौ “मानवता-संकल्पदिवस-” रूपेण कार्यक्रमः सम्पन्नः।विमला-कुन्दन-सेवाग्राम-ट्रस्टद्वारा तथा बालभारती-सीनियर-सेकेण्डरी-विद्यालयद्वारा (पदमपुर-मोटाढाक) संयुक्ततया आयोजितः अयं संकल्पदिवसः एतत् सिद्धं कृतवान् यत् एकः महान् संकल्पः समाजस्य दिशां परिवर्तयितुं शक्नोति। अत्रैव प्रतियोगितायां भागं गृह्णन्तः विद्यार्थिनः “मानवता-प्रहरी” इव स्वविचारान् प्रस्तुतवन्तः।अन्तर्विद्यालयीय-भाषण-प्रतियोगितायां नगरस्य विविध-विद्यालयेभ्यः आगताः छात्राः छात्राश्च यदा “रक्तदानस्य अङ्गदानस्य च महत्त्व-” विषये वक्तुम् आरब्धवन्तः, तदा नूतनसन्ततिः सामाजिक-रूढतां विभज्ज्य सेवायाः नूतनं इतिहासं रचयितुम् उद्यताऽभवत् इव अनुभूतम्। अन्तर्विद्यालयीय-प्रतियोगितायां— प्रथमस्थानं अदिति-बडोला (ब्लूमिंग-वेल्स-विद्यालयः) प्राप, या स्वविचारैः “जीवनोपकारस्य” नूतनां परिभाषां निर्मितवती।

द्वितीयस्थानं सुप्ति-मैन्दोला (ए.वी.एन. विद्यालयः) प्राप्तवती।

तृतीयस्थानं प्राची-रावत (बालभारती-विद्यालयः) प्राप्तवती, या युवान् मानवतामार्गे चलितुम् आह्वानं कृतवती।

## “मृत्युः अन्तः न, नूतनारम्भः”

कार्यक्रमस्य शुभारम्भे संयोजकः श्री गिरिराजसिंह-रावतः, मुख्यसेवकः दलजीतसिंहः तथा प्रधानाचार्या श्रीमती हिमानी-रावतः दीपप्रज्वलनं कृत्वा समाजं प्रति एतत् सन्देशं दत्तवन्तः—सेवा एव ईश्वरस्य सत्यभक्तिः।संयोजकः गिरिराजसिंह-रावतः प्रेरणापूर्णैः शब्दैः अवदत्—“स्वर्गीयः कुणालरावतः अद्य अस्माकं मध्ये भौतिकरूपेण नास्ति, किन्तु कस्यचित् हृदयस्पन्दने, कस्यचित् दृष्टौ स जीवति। अङ्गदानं तत् दिव्यं सेतुः अस्ति यः मृत्युगर्तं तीर्त्वा जीवनस्य विस्तारं करोति। अत्र उपस्थितः प्रत्येकः युवा ‘मानवता-दूतः’ अस्ति, यः समाजे अस्य पवित्रसंकल्पस्य प्रचारं करिष्यति।” समाजस्य ‘यथार्थ-नायकानां’ वन्दनम्

आयोजनकाले तान् व्यक्तीन् सम्मानितं कृतम् ये स्वजीवनं परोपकाराय समर्पितवन्तः। एषः सम्मानम् केवलं प्रतीकः न, अपि तु तेषां त्यागस्य कृतज्ञतासूचकः वर्तते।दीनानाथ-भाटिया (अध्यक्षः, मुक्तिधा; वरिष्ठः समाजसेवी),श्रीमती मञ्जू-सिंह (रक्तदानं, महिला-सशक्तीकरणम्),बबलू-नेगी (पशुसेवा, रक्तदानम्), वाचस्पति-दीक्षितः (मानवसेवा—ऑल केयर फाउण्डेशन), श्रीमती इन्दु-नौटियालः (असहाय-व्यक्तिसेवा), अजय-खन्तवालः (पत्रकारिता, रक्तदान-सेवा), श्री प्रकाश-ढौण्डियालः (गौसेवा),शंकर-बहादुरः (रक्तदानं, शिक्षा), सिद्धार्थ-उनियालः (युवा-मार्गदर्शनम्, क्रीडा-प्रोत्साहनम्), शिवम-नेगी (अध्यक्षः—देवभूमि पहल ग्रीन आर्मी; पर्यावरणसंरक्षणम्, रक्तदान-प्रेरणा, समाजसेवा)तथा याशिका-जखवाल (योग-शिक्षिका; रक्तदान-अङ्गदान- प्रेरिका)। निर्णायक-मण्डले आधारशिलायाः सम्बद्धा नित्य-रक्तदात्री समाजसेविका प्रणिता-कण्डवालः, कविता तथा उत्कर्ष-नेगी (सचिवः—देवभूमि पहल ग्रीन आर्मी) गरिमामयीं उपस्थितिं दत्तवन्तः। विद्यालय-परिवारस्य सदस्याः—मोनिका-बड़थ्वाल, सौरभ-पाण्डेयः, सन्दीप-रावतः तथा रविन्द्र-भारद्वाजः—अस्य सार्थकस्य उपक्रमस्य सफलतायै अमूल्यं योगदानं कृतवन्तः।

# गुरुकुलीयप्रणालीद्वारा विद्यार्थिषु अनुशासनस्य,नैतिकमूल्यस्य समाजं प्रति सम्मानभावनायाः च सञ्चारः "डा.रमेशचन्द्रनैनवालः"

## पौड़ीसंस्कृतविभागेन “गुरुकुलपरम्परानुरूपं शिक्षादर्शनम्” इत्यन्तर्जालीयद्वितीय व्याख्यानस्य आयोजनम् कृतम्



**हिमसंस्कृतवार्ता उत्तराखण्डम्।**कुलदीपमैन्दोला। हेमवतीनन्दनबहुगुणा- गढ़वालकेन्द्रीयविश्वविद्यालयस्य बी. जी. आर. इत्यस्मिन् पौड़ीस्थे परिसरे संस्कृतविभागेन आयोजितायां व्याख्यानश्रृङ्खलायां द्वितीयव्याख्यानस्य आयोजनं सञ्जातम्। कार्यक्रमस्य शुभारम्भः लौकिकमङ्गलाचरणेन अभवत्।अस्मिन् कार्यक्रमे मुख्यवक्तृरूपेण डॉ. रमेशचन्द्रनैनवालः (सहायकाचार्यः, बाबासाहेबभीमरावः अम्बेडकरविश्वविद्यालयः, लखनो) “गुरुकुलपरम्परानुरूपं शिक्षादर्शनम्” इति विषयमधिकृत्य व्याख्यानं दत्तवान्। तेन व्याख्याने निरूपितं यत् भारतदेशः स्वातन्त्र्योत्तरकाले शिक्षाक्षेत्रे विविधप्रयोगान् अनुभूतवान् अस्ति। अद्य वर्तमानकाले यदा अस्माकं राष्ट्रं भारतीयसमस्यानां भारतीयसमाधानानि अन्वेषयति, तदा वयं भारतीयज्ञानस्य विविधविद्याशाखानां प्रति पुनरागच्छामः। एतस्मिन्नेव सन्दर्भे मुख्यवक्त्रा प्राचीनगुरुकुलप्रणाल्याः महत्वं तस्याश्च वर्तमानप्रासङ्गिकता सर्वेषां पुरतः प्रस्तुता। व्याख्याने अस्य विषयस्यापि चर्चा कृता यत् गुरुकुलस्य मूलावधारणा अस्माकं शास्त्रेषु ग्रन्थेषु च कथं वर्णिता अस्ति। तत्र ज्ञानस्य चत्वारः चरणाः, अष्टाङ्गिकमार्गः, गुरुकुलीयपरम्परायां गुरोः महत्वं तस्य स्वभावश्च, तथा सम्पूर्णा गुरुकुलीयाधिगमप्रक्रिया विस्तरेण विवेचिता। कार्यक्रमे एतदपि विवेचितं यत् गुरुकुलीयप्रणालीनां माध्यमेन विद्यार्थिषु कथं अनुशासनस्य, नैतिकमूल्यानां च समावेशनं, समाजस्य प्रति सम्मानभावनायाः च सञ्चारः क्रियते स्म।कार्यक्रमस्य अध्यक्षतां परिसरनिदेशकः प्रो. यू. सी. गैरोला महोदयः अकरोत्। केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरस्य निदेशकः प्रोफेसरः पी. वी. बी. सुब्रह्मण्यम् महोदयः स्वोद्बोधनेन सर्वान् सम्बोधितवान्।अतिरिक्ततया कार्यक्रमसमन्वयिका प्रो. कुसुमडोबरियालः, पूर्वपरिसरनिदेशकः प्रो. अनूपडोबरियालः, प्रो. अनीतारुडोला, डॉ. पूनमबिष्टारावतः, डॉ. एन. के. आर्यः, डॉ. विश्वेशवाग्मी, डॉ. नीलमनेगी, डॉ. धर्मेन्द्रकुमारः, डॉ. अमनकुमारशर्मा, डॉ. विपुलसिंहः, डॉ. बिन्दुयादवः, डॉ. मनोजकुमारः, डॉ. सपनारावतः, डॉ. देवेन्द्रसिंहः, डॉ. दीवानसिंहराणा, डॉ. कृपालसिंहतोमरः, डॉ. ललिता, डॉ. पंकजकोटियालः, डॉ. सी. बी. कोटनाला, डॉ. प्रीतिः, डॉ. बालकृष्णबधानी, डॉ. राजपालशास्त्री इत्यादयः विभिन्नविभागानां शिक्षकाः, शोधार्थिनः तथा बहुसंख्यकाः विद्यार्थिनः अपि उपस्थिताः आसन्।उपस्थिताः श्रोतारः विषयं समसामयिकं अत्यन्तं प्रासङ्गिकं च मन्यमानाः व्याख्यानस्य प्रशंसां अकुर्वन्। कार्यक्रमस्य संचालनं डॉ. गोकुलचन्द्रफुलारा अकरोत्, तकनीकीसंयोजनं डॉ. बिपिनकुमारः अकरोत्, तथा कार्यक्रमे उपस्थितानां सर्वेषां स्वागतं, धन्यवादज्ञापनं च कार्यक्रमस्य सफलसंयोजनं संस्कृतविभागस्य सहायकाचार्यः डॉ. दिनेशचन्द्रपाण्डेयः कृतवान् ।

# कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालये

## राज्यस्तरीया अखिलभारतीयशास्त्रीयस्फूर्तिस्पर्धा सम्पन्ना







हिमसंस्कृतवार्ता डॉ .निशिकान्तपाण्डेयः। कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालये केन्द्रीयसंस्कृतविश्वविद्यालयस्य साहाय्येन असम–अरुणाचलप्रदेश–मणिपुरराज्यानां प्रतिभागिनां समुपस्थित्या राज्यस्तरीया अखिलभारतीय-शास्त्रीयस्फूर्तिस्पर्धा भव्यतया आयोजिता। स्पर्धाया उद्घाटनसमारोहः पूर्वाह्ने ११ वादनतः प्रारब्धः।उद्घाटनसमारोहस्य आरम्भः विश्वविद्यालयीय-वेदाध्ययनविभागस्य अध्यापकेन महेशभट्टमहोदयेन वैदिकमङ्गलाचरणेन कृतः। कार्यक्रमस्य सञ्चालनं स्पर्धायाः सहसंयोजिकया सर्वदर्शन-विभागीयाध्यापिकया सुश्रीलोपामुद्रा-गोस्वामिमहोदयया सुसूत्रितया निर्वाहितम्। तत्र साहाय्यं विधत्तं स्पर्धायाः सहसंयोजकेन डॉ मिलनमाजीमहोदयेन। समारोहे विश्वविद्यालयस्य कुलगुरवः आचार्याः प्रह्लादराजोशीवर्याः प्रमुखतया उपस्थिता आसन्। तैः स्पर्धायां समागतेभ्यः सर्वेभ्यः प्रतिभागिभ्यः हार्दिकं स्वागतं कृतम्, संस्कृतशास्त्राणां संरक्षणे–प्रसारे च एतादृशीनां प्रतियोगितानां महत्त्वं प्रतिपादितं च। तदनन्तरं विश्वविद्यालयस्य कुलसचिवः प्रो. विकासभार्गवशर्ममहोदयः अपि स्वीयं प्रोत्साहनवचनं प्रकटितवान्। अत्रैव स्पर्धाया संयोजकः तथा च सर्वदर्शनविभागाध्यक्षः प्रो. रणजीतकुमारतिवारीमहोदयः स्पर्धाया विशेषसन्दर्भं विवृण्वन् प्रतियोगितानाम् उद्देश्यं स्वरूपं नियमान् च स्पष्टतया अवबोधितवान्। अतिथित्वेन शराईघाटमहाविद्यालयस्य अध्यक्षः डॉ. मणिशर्ममहोदयः तथा भट्टदेवमहाविद्यालयस्य संस्कृतविभागस्य सहाचार्या डॉ. रुणिमाशर्ममहोदया अपि समुपस्थितौ आस्ताम्। सभायां विश्वविद्यालयस्य ध्येयवाक्यस्य पठनं सर्वदर्शनविभागस्य शोधच्छात्रेण लिराजकाफ्लेन कृतम्। उद्घाटनसत्रानन्तरं नानाविषयेषु बह्व्यः शास्त्रीयाः स्पर्धाः आयोजिता आसन्। तासु प्रमुखतया—साहित्यभाषणम्, धर्मशास्त्रभाषणम्, वेदभाष्यभाषणम्, ज्योतिषभाषणम्, व्याकरणशलाका, साहित्यशलाका, न्यायशलाका, मीमांसाशलाका, वेदान्तशलाका, ज्योतिषशलाका, पुराणेतिहासशलाका, भारतीय-गणितशलाका, अर्थशास्त्रशलाका, काव्य-शलाका, काव्यकण्ठपाठः, अष्टाध्यायीकण्ठपाठः, सुभाषित-कण्ठपाठः, रामायणकण्ठपाठः, उपनिषत्कण्ठपाठः, चरकसंहिताकण्ठपाठः, समस्यापूर्तिः, अक्षरश्लोकी, शास्त्रार्थविचारः, शास्त्रीयस्फूर्तिस्पर्धा इत्यादयः अन्तर्भूताः आसन्।एतासु स्पर्धासु असमराज्यस्य विविधसंस्थाभ्यः गुरुकुलेभ्यः च, सहैव अरुणाचलप्रदेशात् मणिपुरात् च आगताः बहवः प्रतिभागिनः उत्साहपूर्वकं भागं गृहीतवन्तः। विश्वविद्यालयप्रशासनद्वारा सर्वाः स्पर्धाः अतीव सुव्यवस्थिततया सञ्चालिताः। समग्रकार्यक्रमः संस्कृतविद्याया जीवंतपरम्परां सुदृढीकुर्वन् शास्त्रीयप्रतिभानां संवर्धने महत्त्वपूर्णं योगदानं विदधाति।

# रामनगर-महाविद्यालये भारत-

# बौद्धिक-राष्ट्रिय-परीक्षा

## जनवरीमासे 31 दिनांके भविष्यति

रामनगरम्। पी.एन.जी. राजकीय-स्नातकोत्तर-महाविद्यालये रामनगरे अध्ययनरतानां स्नातक-स्नातकोत्तर-स्तरीय-समस्त- छात्र-छात्राणां च कृते विद्या-भारती-उच्च-शिक्षा-संस्थानम्, उत्तराखण्डस्य आयोजकत्वेन भारत-बौद्धिक-राष्ट्रीय-परीक्षा २०२५–२६ इत्यस्य आयोजनं क्रियते।अस्याः परीक्षायाः महाविद्यालय-समन्वयकः (संयोजकः) डॉ. मूलचन्द्र-शुक्लः अवदत् यत् अस्यां सशुल्क-परीक्षायां आहत्य २१२ छात्राः च पञ्जीकरणं कृतवन्तः सन्ति। एते सर्वे पञ्जीकृत-विद्यार्थिनः निर्धारित-परीक्षा-दिने ३१ जनवरी २०२६ दिनांके रामनगर-महाविद्यालये स्थिते परीक्षा-केन्द्रे परीक्षार्थं उपस्थिताः भविष्यन्ति। परीक्षायाः समयः प्रातः १० वादने आरभ्य मध्याह्ने १२ वादनपर्यन्तं भविष्यति।परीक्षायाः प्रथम-भागे आहत्य १८० बहुविकल्पीय-प्रश्नाः भविष्यन्ति, येषु केवलं ८० प्रश्नानां उत्तराणि दातव्यानि सन्ति। द्वितीय-भागे विस्तृतोत्तरात्मकाः चत्वारः पञ्च वा प्रश्नाः भविष्यन्ति, येषु २० अङ्कानां एकस्य प्रश्नस्य उत्तरं लेखनीयं भविष्यति। एषा बौद्धिक-परीक्षा राष्ट्रिय-स्तरे आयोजिता अस्ति। अस्यां परीक्षायां प्रथम-स्थानं प्राप्ताय एकस्मै प्रतिभागिने एक-लक्ष-रूप्यकाणां धनराशिः पुरस्काररूपेण प्रदास्यते। द्वितीय-स्थानं प्राप्ताभ्यां द्वाभ्यां प्रतिभागिभ्यां पञ्चाशत्-सहस्र-रूप्यकाणि, तृतीय-स्थानं प्राप्तेभ्यः चतुर्भ्यः विजेतृभ्यः पञ्चविंशति-सहस्र-रूप्यकाणि च प्रदास्यन्ते। सान्त्वना-पुरस्कार-प्राप्तेभ्यः द्विशत-विजेतृभ्यः द्विसहस्र-पञ्चशत-रूप्यकाणि पुरस्काररूपेण प्रदीयन्ते। परीक्षायाः सुचारु-सम्पादनार्थं महाविद्यालयस्य प्राचार्यः प्रो. एम.सी. पाण्डेयः निर्मितसमित्या नियमानुसारं परीक्षां सम्पन्नं कर्तुं प्रतिबद्धतां प्रकटितवान्। अस्यां समितौ संयोजकः डॉ. मूलचन्द्र-शुक्लः, उपसंयोजकाः डॉ. नीमा-राणा, डॉ. सुभाष-पोखरियालः, डॉ. ममता-भदोला-जोशी च, तथा परीक्षा-प्रभारी डॉ. शरद-भट्टः सन्ति। प्राचार्यः समस्त-परीक्षार्थिभ्यः शुभकामनाः प्रेषितवान् तथा च उत्तम-सिद्धतां कृत्वा परीक्षायां सहभागितां कर्तुम् अपेक्षां व्यक्तवान्।

# महाराष्ट्रराज्यसंस्कृतशास्त्रप्रतियोगितायां कविकुलगुरुकालिदास-संस्कृतविश्वविद्यालयस्य दलस्य उत्कृष्टं प्रदर्शनम्




हिमसंस्कृतवार्ताः - डॉ रेणुका बोकारे, नागपुरम्। नवदेहलीस्थितस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य नासिकपरिसरे सम्प्रति 'महाराष्ट्रराज्यस्तरीया संस्कृतशास्त्रप्रतियोगिता' आयोजिता आसीत्। अस्यां प्रतियोगितायां कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य सप्तविंशतिः (२७) छात्राः व्याकरणशलाका-वेदान्तशलाका-जैनबौद्धभाषण-धातुरूपकण्ठपाठ-साहित्यभाषण-धर्मशास्त्रभाषण-काव्यशलाका-समस्यापूर्ति-अक्षरश्लोकीत्यादिषु विविधासु प्रतियोगितासु भागं गृहीतवन्तः।भारतस्य विकासे प्राचीनशास्त्रपरम्परायाः अतीव-महत्त्वपूर्णं स्थानं वर्तते। अस्याः शास्त्रपरम्परायाः संरक्षणाय संवर्धनाय च संस्कृतविश्वविद्यालयः निरन्तरं कटिबद्धः अस्ति। शास्त्राध्ययनेन सह शास्त्रकण्ठस्थीकरणं, शास्त्रशलाकापरीक्षा, शास्त्रभाषणं च इति पारम्परिकप्रतियोगितासु छात्रान् सज्जीकर्तुं विश्वविद्यालयस्य प्राध्यापकाः छात्राः च निरन्तरं प्रयतन्ते। एतेषाम् एव प्रयत्नानां प्रतिफलं राज्यस्तरीयायां प्रतियोगितायां समाजस्य सम्मुखं प्रकटितम्।विविधशास्त्रीयप्रतियोगितासु विश्वविद्यालयस्य ११ छात्राः प्रथमस्थानं तथा ९ छात्राः द्वितीयस्थानं प्राप्य प्रशंसनीयां उपलब्धिं अर्जितवन्तः।

विशेषरूपेण उल्लेखनीयं वर्तते यत् प्रथमस्थानं प्राप्ताः सर्वे छात्राः आगामी मार्चमासे काञ्चीपुर्यां केन्द्रीयसंस्कृतविश्वविद्यालयेन आयोजितायां राष्ट्रियस्तरीयायां 'अखिलभारतीयशास्त्रीयप्रतियोगितायां' स्वशास्त्रकौशलं प्रदर्शयिष्यन्ति। शास्त्रविद्यागुरुकुलस्य सर्वैः प्राध्यापकैः एतेभ्यः छात्रेभ्यः मार्गदर्शनं प्रदत्तम्।

### विजेतारः छात्राः (प्रथमस्थानम्)

व्याकरणभाषणे नुपूर कुलकर्णी, साहित्यभाषणे साक्षी खडसे, सांख्ययोगभाषणे कृतिका जैन, मीमांसाभाषणे गौरी पाठक, वेदान्तभाषणे ईशा मशानकर, धर्मशास्त्रभाषणे धनश्री शर्मा, ज्योतिषशलाकायां सानिया बावणे, पुराण-इतिहासशलाकायां नीलाक्षी धिर्णीकर, काव्यशलाकायां अथर्व भारद्वाजः, अष्टाध्यायीकण्ठपाठे अनुराग आनन्दः तथा शास्त्रस्फूर्तिप्रतियोगितायां अथर्व भारद्वाजः एवं पौरवः च प्रथमस्थानं प्राप्तवन्तः।

### विजेतारः छात्राः (द्वितीयस्थानम्)

न्यायभाषणे मीनाक्षी सारस्वत, भारतीयविज्ञानभाषणे गिरिजा कुलकर्णी, भारतीयगणितशलाकायां शिवकुमार जङ्गमः, काव्यकण्ठपाठे संदली सिंह, धातुरूपकण्ठपाठे लोकेश प्रधानः, सुभाषितकण्ठपाठे अनन्या जैन, दर्शनसूत्रकण्ठपाठे प्रचिती वखरे, चरकसंहिताकण्ठपाठे हिमांशु शर्मा तथा समस्यापूर्तौ अथर्व भारद्वाजः च द्वितीयस्थानं प्राप्तवन्तः।

मान्यवरैः छात्रेभ्यः नकद-पुरस्काराः (Cash Prizes) प्रमाणपत्राणि च प्रदत्तानि। अस्य दलस्य नेतृत्वं श्री निशान्त मिश्रः तथा प्रा. सुजाता द्रव्यकार महोदया कृतवन्तौ।

# विद्यायाः महत्त्वम्



असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

विद्यायाः, अर्थात् शिक्षायाः प्रकृतार्थो यत् ज्ञानस्य आहरणं, तथा तदनुसारञ्च जीवने आचरणञ्चेति । उत्तमस्ति यत् -
"विद्यानाम नरस्य रूपमधिकं
प्रच्छन्नगुप्तं धनम्
**विद्या भोगकरी यशःसुखकरी**
**विद्या गुरूणां गुरुः ।**
**विद्या बन्धुजनो विदेशगमने**
**विद्या परं दैवतम्**
**विद्या राजसु पूज्यते न तु धनं**
**विद्याविहीनः पशुः।।" इति ।**
अर्थात्, विद्या हि मनुष्यस्य सौन्दर्यं, गुप्तधनं, गुरोरपि गुरुः, भ्रमणकाले परमबन्धुः, परमदेवः, राजस्थाने चापि पूज्यते विद्येयं, न वा धनं पूज्यते । तस्माद् विद्यायाः परमं महत्त्वं वर्णयितुं न शक्यते । परन्तु यः विद्याहीनः, सः पशुतुल्यः कथ्यते ।
मानवस्य आचरण-प्रवृत्यादिकं यथासाध्यं संशुद्ध्य तं विशेष-जीवत्वेन आनेतुं यः प्रयासः, तदेव शिक्षायाः लक्ष्यम् । अतीतकालतः वर्तमानकालपर्यन्तं शिक्षायाः अर्थविषये नानाविद्वज्जनैः विविधं मतपोषणं कृतमस्ति इत्यतः शिक्षायाः प्रकृतार्थः केवलं ज्ञानाहरणमात्रेऽपि सीमाबद्धस्तु नैव खलु । एतस्याः अर्थः व्यापकः विस्तृतश्च वर्तते । मानवस्य सामाजिकजीवनारम्भस्य समनन्तरं हि शिक्षायाः अपि आरम्भः भवति । अनेन सामाजिकजीवनमाध्यमेन प्रमुखजनाः समाजसदस्येभ्यः प्रयोजनानुसारं नानाविधां शिक्षां प्रदत्तवन्तः आसन् । आधुनिकसमाजस्य इव अतीतसमाजस्य जटिलता तावती नासीत्, इत्यतः तदानीन्तनी शिक्षाप्रणाली अत्यन्तं सरला सुकरा च आसीत् । समयपरिवर्तनस्य समनन्तरं हि समाजस्यापि परिवर्तनं जातम् । सभ्यतायाः प्रगतिः, एवं देशस्य प्रयोजनानुसारं शिक्षापद्धतिः इति द्वयोरपि परिवर्तनम् अभवत् । शिक्षा हि आधुनिकसमाजस्य एकं मूलम् उपकरणम् इति परिगणितं जातम् । एतस्य कारणम् अतीतसंस्कृतिः एवं सभ्यता शिक्षाद्वारा हि अवगन्तुं शक्येते ।
शिशुः जन्मप्राप्तेः अनन्तरं हि न कामपि अभिज्ञतां प्राप्तुमर्हः । तस्य वाक्शक्तेः, अङ्गप्रत्यङ्गानाञ्च किञ्चित्प्रमाणेन परिपुष्टिसबलादिकं यदा भवति तदा हि शिशुः भङ्गध्वनिनाः वक्तुं प्रयतते । परिवारस्य मध्ये क्रमशः शिशुः एधते । माता, पिता, परिवारस्य अन्यसदस्यः इत्यादिभ्यः सः नानाविषयान् शिक्षते, अभिज्ञताञ्च प्राप्नोति । एवमेव क्रमशः सः प्रयोजनीयं ज्ञानं लभते । नानाविधपरिस्थित्याः एवम् अवस्थायाः माध्यमेन शिशुः स्वकीयं भावं प्रकाशयितुं सक्षमः भवति । सुस्थं सरलं सुखि सफलञ्च जीवनं यापयितुं मानवाय बहूनां विषयाणां ज्ञानम् आवश्यकं भवति । एतत्सर्वं ज्ञानं केवलम् अभिज्ञतामाध्यमेन हि आत्मसात् कर्तुं न कोऽपि प्रभवति । अतः तस्य कृते शिक्षानुष्ठानस्य आवश्यकता भवति । निर्दिष्टानुष्ठानमाध्यमेन हि प्रयोजनीयः ज्ञानराशिः आयत्तीकर्तुं शक्यः।
शिक्षा मानवजीवनस्य अविच्छेद्या प्रधाना च अङ्गस्वरूपा । एतां विहाय मानवजीवनम् असम्पूर्णम् । शिक्षा एका जीवनप्रवाहभूता एवं गतिशीलधारणेयम् । शिक्षायाः प्रकृतार्थस्य उद्घाटनम् इतोऽपि न जातम्, तद्विषयसम्बन्धानाम् आलोचनानाम् इतोऽपि परिसमाप्तिर्न जाता । इयं मानवजीवनस्य धारावाहिकप्रवाहभूता । शिक्षामाध्यमेन मानवः चिन्ता-सांस्कृतिकधारणादिभिः नूतनं जीवनमार्गम् अन्विष्य, बुद्धिज्ञानादीनां प्रसारेण जगति शुभाशुभविषयिणीं विचारशक्तिं अधिगच्छेत् । वस्तुतः शिक्षामाध्यमेन एव मनुष्यः पशुत्वं विहाय मनुष्यत्वं प्राप्नुयात्, किमधिकं देवत्वमपि अधिगन्तुं शक्नुयात् । अतः जीवने सच्छिक्षायाः अत्यन्तम् आवश्यकता अस्ति यत् तत् निराकर्तुं न शक्यते कदापीति, शुभम् ।

## लौकिकन्यायकोशः*" (३८)

## पुष्पवन्तोपकारकन्यायः

पुष्पवन्तौ इति सूर्यचन्द्रमसौः साकल्येन व्यपदेशः।पुष्पं नाम प्रकाशः।पुष्पवन्तौ नाम प्रकाशकौ इति भावः।यथा अनयोः उपकारकस्वभावः तथा सज्जनानमपि सदा उपकारकस्वभावो भवतिति भावः ।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**



हिमसंस्कृतवार्ताः , ईदधीरजः,हैदराबादः

# वार्तासंवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
काव्या- नमस्ते नन्दिनि। आदौ एका कौतुक-वार्ता श्रूयताम्। उत्तर-प्रदेशे एकेन वितरकेण चक्र-पादुकाभ्यां गत्वा पण्यं समर्पितम्।
नन्दिनी- अहो, तत् तु भयावहम्। इदानीं बेङ्गलूरु-नगरस्य वृत्तान्तः। तत्र एकेन गृह-स्वामिना व्यय-सङ्कोचनाय "आरक्षकाः वीक्षण-यन्त्राणि च न अपेक्षितानि" इति प्रतिपादितम्।
काव्या- एतत् तु अनुचितम्। तेन वचनेन अन्तर्जाले महती चर्चा सञ्जाता। सुरक्षा एव मुख्या खलु।
नन्दिनी- सत्यम्। इदानीं काचित् खेदजनिका वार्ता। कैश्चित् मत्त-धीवरैः मृतस्य तिमिङ्गलस्य देहम् आरुह्य छायाचित्राणि स्वीकृतानि।
काव्या- धिक् तान् जनान्। अनेन व्यवहारेण लोकः क्षुब्धः जातः। वन्य-जीवान् प्रति अनादरः प्रदर्शितः।
नन्दिनी- आम्, तत् तु पापम्। इदानीम् आङ्ग्ल-देशस्य एका वार्ता। तत्र केनचित् जनेन महा-धनराशिः जिता। किन्तु जेत्रा तत् न ज्ञातम्।
काव्या- अहो आश्चर्यम्। सः कोटीश्वरः जातः। आशासे सः शीघ्रम् आगच्छेत्। अद्यतन-वार्ताः समाप्ताः। नमो नमः।

# दुग्धं किमर्थं सम्यक् नास्ति, दधिः किमर्थं सम्यक् अस्ति?



हिमसंस्कृतवार्ताः , डॉ.विदुषी अग्रवालः

दुग्धपानं कष्टकरं भवितुं शक्नोति, न केवलं वयस्कानां कृते अपितु बालकानां कृते अपि!मधुमेहस्य (Diabetes Type 1 / Type 2) आरम्भं दुग्धस्य कारणेन भवितुं शक्नोति, अथवा मधुमेहस्य वृद्धिम् अपि दुग्धः कर्तुं शक्नोति।दुग्धे 'लैक्टोज' नाम्नः शर्करा भवति, यस्याः पाचनाय 'लैक्टेज' नाम्नः पाचकस्य (enzyme) आवश्यकता भवति।विज्ञानस्य शोधानुसारं, ६५% जनानां शरीरे सप्तवर्षीय आयुतः परं 'लैक्टेज' पाचकं (enzyme) समाप्तं भवति। अतः मनुष्याणां कृते दुग्धस्य पाचनं अतीव कठिनं।
अवशिष्टेषु ३५% जनेषु अपि आयुवृद्ध्या सह एषः पाचकः न्यूनः भवति।
यदि 'लैक्टोज' शर्करायाः पाचनं भवति, तर्हि सा 'ग्लूकोज' (Glucose) तथा 'गैलेक्टोज' (Galactose) मध्ये झटीति परिवर्तते। यतः दुग्धे तन्तुमयपदार्थाः (fibre) न भवन्ति, अतः रक्ते शर्करायाः स्तरः शीघ्रं वर्धते।अतः अस्माभिः दुग्धं न पातव्यम्!

### किमर्थं दधिः खादितुं शक्यते?

यदा दधि-निर्मितं भवति, तदा 'लैक्टोज' शर्करा 'लैक्टिक एसिड' (Lactic Acid) मध्ये परिवर्तते। 'लैक्टिक एसिड' तु शरीरे पच्यते अथवा शरीरात् बहिः निर्गच्छति।
चिकित्सकाः / वैद्याः अस्मान् 'कैल्शियम' (Calcium) इति कारणतः दुग्धं पातुं वदन्ति। परन्तु अत्र ध्यानं देयं यत्, दध्नि अपि कैल्शियम भवति यावत् दुग्धे।
अतः अस्माभिः तादृशं भोजनं कर्तव्यं यत् सुपाच्यं भवेत् तथा स्वास्थ्यं अपि रक्षेत्। *

# उपराष्ट्रपतिः सी.पी. राधाकृष्णन् युवानां पीढीं मादकद्रव्याणां दूरं स्थातुम् आग्रहं कृतवान्

उपराष्ट्रपतिः सी.पी. राधाकृष्णन् युवानां पीढीं मादकद्रव्याणां दूरं स्थातुं, सामाजिकमाध्यमानां सावधानीपूर्वकं उपयोगं कर्तुं, आत्मसंयमं कर्तुं च आग्रहं कृतवान् अस्ति। बेङ्गलूरुनगरे सीएमआर-प्रौद्योगिकीसंस्थायाः रजतजयन्ती-समारोहे सः एतानि वचनानि अकरोत् । उपराष्ट्रपतिः युवानां कृते विघ्नानां सम्मुखे हारं न त्यजन्तु इति आग्रहं कृत्वा सफलता केवलं प्रतिबद्धतायाः, परिश्रमस्य च माध्यमेन एव सम्भवति इति बोधयति स्म राधाकृष्णन् छात्राणां उत्तरदायी नागरिकानां स्वरूपनिर्माणे शैक्षणिकसंस्थानां भूमिकायां बलं दत्तवान् । शिक्षकाः छात्राणां मार्गदर्शनं कुर्वन्तु, तेषां चरित्रस्य विकासं च कुर्वन्तु। उपराष्ट्रपतिः अधुना भारतं प्रौद्योगिक्याः अग्रणीरूपेण उद्भवति इति बोधितवान् । सः युवानः २०४७ तमवर्षपर्यन्तं विकसितभारतस्य दृष्टिः प्राप्तुं कार्यं कर्तुं आग्रहं कृतवान् ।